“इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारीति गौ० सू० [अव्यभिचरितशब्दे विवृतिः ।

**अव्यभिचार** पु० अभावे न०त० । १व्यभिचाराभावे २नैयत्यरूपे

**अव्यय** पु० न० वि+इण्—अच् न०त० । सर्वासु विभक्तिषु सर्व्ववचनेषु च एकरूपे १शब्दवृत्तिधर्म्मविशेषे, यथास्वरादयोव्ययाः सर्व्वत्रैकरूपाः २शिवे ३विष्णौ च पु० । आद्यन्तरहिते ४विकारशून्ये त्रि० ५परब्रह्मणि न० । “सदृशं त्रिषु लिङ्गेषु सर्व्वासु च विभक्तिषु । वचनेषु च सर्व्वेषु यन्न व्येति तदव्ययमिति”श्रुतिः । प्रवाहरूपेण ६सर्व्वदा-स्थिते च “अश्वत्थं प्राहुरव्ययम्” गीता “मनसावयवैः सूक्ष्मं सर्वभूतकृदव्ययम्” सूक्ष्माभ्यो मूर्त्तिमात्राभ्यः संभवत्यव्ययाद्व्ययम्” मनुः ७अव्ययफलदे च “भूराद्यास्तिस्र एवैता महाव्याहृतयोऽव्ययाः । छन्दोग० “अव्यया अव्ययफलदा मोक्षदा” इति आ०त०रघु० । “अव्ययः पुरुषः साक्षी” विष्णुस० । [भावे ।

**अव्ययात्मन्** त्रि० अव्यय आत्मा स्वभावो यस्य । अविनश्वरस्व-

**अव्ययीभाव** पु० अनव्ययमव्ययं भवत्यनेन अव्यय+च्वि—भू करणे घञ् । व्याकरणसिद्धे समासविशेषे । तत्र हि उपकुम्भमित्यादौ अनव्ययस्यापि कुम्भादिपदस्याव्ययत्वम् “अव्ययीभावश्चेति” पा० सूत्रे तथाभिधानात् । “द्वन्द्वो-द्विगुरपि चाहं नित्यं मद्गेहेऽव्ययीभावः । तत् पुरुष! कर्म्मधारय येनाहं स्यां बहुव्रीहिः” उद्भटः ।

**अव्यर्थ** त्रि० न व्यर्थः । १सफले २सार्थके च ।

**अव्यलीक** त्रि० विरोधे न०त० । १प्रिये सत्ये च “इत्थं गिरः प्रियतमा इव सोऽव्यलीकाः शुश्राव सूततनयस्य तदाऽव्यलीकाः” माघः ।

**अव्यवधान** न० अभावे न०ब० । १व्यवधानाभावे नैकट्ये “यत् पदार्थस्य यत् पदार्थेनान्वयोऽपेक्षितस्तयोरव्यवधाने नोपस्थितिः कारणम्” आसत्तौ मुक्ता० । न०ब० । २व्यवधानशून्ये अव्यवधानञ्च द्विविधं देशकृतं कालकृतञ्च । पूर्व्वोत्तरक्षणादौ कालिकं द्रव्यान्तरेणानावरणे दैशिकम् ।

**अव्यवसाय** पु० व्यवसायः निश्चयउद्यमश्च अभावे न०त० । १निश्चयाभावे२उद्यमाभावे च । न०ब० । २व्यवसायशून्ये त्रि० ।

**अव्यवसायिन्** त्रि० न व्यवस्यति वि+अव—सो—णिनि न०त० । १उद्यमाभाववति अनुद्यते २निश्चयाभाववति निश्चयशून्ये । “बुद्धयोऽव्यवसायिनाम्” गीता ।

**अव्यवस्था** स्त्री वि+अव+स्था—अङ् अभावे विरोधे वा न०त० । “इदं कर्त्तव्यमिदं नेति” १नियमाभावे, २शास्त्रादिविरुद्धायां व्यवस्थायाम् अविधौ च । “किमव्यवस्थाञ्चलितोऽपि केशवः” माघः । न०ब० । ३मर्य्यादाशून्ये ४अविहिते ५स्थितिरहिते चले च त्रि० । “स्थलारविन्दश्रियमव्यवस्थामिति” कुमारः “अव्यवस्थां सञ्चारिणीम्” मल्लि० ।

**अव्यवस्थित** त्रि० वि+अव—स्था+क्त न०त० । १शास्त्रादिमर्य्यादारहिते २अनियतरूपे “अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः” नीति० ३चञ्चले च ।

**अव्यवहार्य्य** त्रि० वि+अव+हृ—ण्यत् न०त० । शयनासनभोजनादौ एकत्रावस्थानायोग्ये पतितादौ “कामतोऽव्यवहार्य्यस्तु वचनादिह जायते”स्मृतिः । अव्यवहार्य्यास्तु पातित्यहेतुकर्म्मकारिणः स्मृतावुक्तावेद्यास्तेषां संसर्गविशेषोऽपिनिषिद्धः यथा “याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनम् । कृत्वा सद्यः पतन्त्येते पतितेन न संशयः” देवलः “शरणागतबालस्त्रीहिंसकान् संवसेन्न तु । चीर्णव्रतानपि सदा कृतघ्नसहितानपि” या०स्मृ० । स्त्रीघातकस्याव्यवहार्य्यत्वञ्च हीनवर्णोपभुक्ताव्यतिरिक्तविषयम् “हीनवर्णोपभुक्ता या त्याज्या बध्याऽपि वा भवेत्” वृह०स्मृतौ तस्या बध्यत्वोक्तेः अत्र कृतप्रायश्चित्तानामपि अव्यवहार्य्यतोक्तेः अकृतप्रायश्चित्तानां सुतरां तथात्वम् तच्च शङ्कापूर्व्वं प्रा०त० रघुनन्दनेन समर्थितं यथा । “पापाभावे कथमव्यवहार्य्यता” इति चेत् या०स्मृतौ वचनादिह जायते इत्युक्तेस्तथात्वम् । तथाच किमिव वचनं न कुर्य्यात् नास्ति वचनस्यातिभारः तथाहि पापस्य द्वे शक्ती नरकोत्पादिका व्यवहारविरोधिका च । तत्रैकतरशक्तिविनाशेऽपि व्यवहारविरोधिका शक्तिरस्त्येवेति यथोक्तमापस्तम्बेन “नास्यास्मिन् लोके प्रत्यासत्तिर्विद्यते कल्मषन्तु विहन्यते” इति प्रत्यासत्तिर्भोजनादौ सान्निध्यम्” मिताक्षरायान्तु कामतो व्यवहार्य्य इत्येव पाठः तथैव तेन व्याख्यातं च “प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् । कामतो व्यवहार्य्यस्तु वचनादिह जायते” या०स्मृ० । “प्रायश्चित्तैः वक्ष्यमाणैरज्ञानाद्यदेनः पापं कृतं तदपैति अपगच्छति न कामतः कृतम्” किन्तु तत्र प्रायश्चित्तविधायकवचनबलादिह लोके व्यवहार्य्यो जायते इति” समर्थितश्चायमर्थ आशङ्कापूर्व्वकं तत्रैव यथा “ननु कामकृते प्रायश्चित्ताभावात् कथं व्यवहार्य्यत्वम् ? तदभावश्च ‘अनभिसन्धिकृतेऽपराधे प्रायश्चित्तमिति” वसिष्ठवचनात्, “इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम् । कामतो ब्राह्मणबधे निष्कृतिर्न विधीयते” इति मनुवचनाच्चावगम्यते । नैतत् ।